सन्नन्तात्, यङन्ताच्च पूर्वोक्ततनुधातुवत् (699) रूपाणि ज्ञेयानि। [A]वितनन्[1] तनन्। [2]नितान्तम्।

(701) " तन्चु गत्यर्थः " (I-भ्वादिः-191. सक. सेट्. पर.)

आङुपसृष्टस्यास्यार्थो भिद्यते-यथा-आतञ्चनम्=पयसि रसविशेषोत्पादनाय घनीभावाय च तक्रस्य किञ्चिन्मिश्रणम्। तञ्चकः-ञ्चिका, तञ्चकः ञ्चिका, तितञ्चिषकः-षिका, तातचकः-चिका-इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकचञ्चतिवत् (496) ज्ञेयानि। [B]तञ्चन्-न्ती। [3]तक्रम्।

(702) " तन्चू सङ्कोचने " (VII-रुधादिः-1459. सक. सेट्. पर.)

'तञ्जू—' इति क्षीरस्वामिसम्मतः पाठः। जकारान्तमध्ये पाठात् एवमेव न्याय्यम्, इति तदाशयः।

तञ्चकः-ञ्चिका, तञ्चकः-ञ्चिका, [4]तितञ्चिषकः-षिका-तितङ्क्षकः-क्षिका, [5]तातचकः-चिका;

[6]तञ्चिता-तङ्क्ता-त्री, तञ्चयिता-त्री, तितञ्चिषिता-तितङ्क्षिता-त्री, तातचिता-त्री;

---

1. णिजभावपक्षे 'शेषात् कर्तरि—' (1-3-78) इति परस्मैपदम् शता।
2. क्तप्रत्यये, 'अनुनासिकस्य—' (6-4-15) इति दीर्घे च रूपमेवम्।
3. 'स्फायितञ्चिवञ्चि—' [द. उ. 8. 31.] इति रक्प्रत्ययो भवति। कित्त्वादुपधानकारस्य लोपः। न्यङ्क्वादित्वात् (7-3-53) कुत्वम्। तक्रम्=उदश्वित्।
4. ऊदित्त्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा (7-2-44) इति सूत्रेणास्य धातोर्वलाद्यार्धधातुकस्येड्विकल्पः। इडभावपक्षे, 'चो कुः' (8-2-30) इति चकारस्य ककारः। 'नश्चापदान्तस्य झलि' (8-3-24) इत्यनेन, नकारस्यानुस्वारे, 'आदेशप्रत्यययोः' (8-4-59) इति सनः सकारस्य षकारः। 'अनुस्वारस्य ययि—(8-3-58) इति परसवर्णे च तितङ्क्षकः इति रूपम्। एवमिडभावपक्षे सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया।
5. यङन्ताण्वुलि, 'अनिदिताम्—' (6-4-24) इत्युपधानकारस्य लोपे 'यस्य हलः' (6-4-49) 'अतो लोपः' (6-4-48) इति क्रमेण यकाराकारयोर्लोपे द्वित्वे च रूपम्। एवं यङन्ते सर्वत्र ज्ञेयम्।
6. ऊदित्त्वेन वलादेरार्धधातुकस्येड्विकल्पः। इडभावपक्षे, कुत्वानुस्वारपरसवर्णा भवन्ति। एवं तव्यदादिष्वपि ज्ञेयम्।

A. 'आपन् खेदमरिं तनन् जनहितं चिक्रीड गोपैर्हरिः
तूर्योत्थो वितनन् ध्वनिर्दिवमगाद् दूतो यथा वादितः॥' धा. का. 3 51.

B. 'आवक्रचञ्चूपुटतञ्चदारवत्वञ्चत्खगम्रुक्तशिखैर्लताद्रुमैः।' धा. का. 1.26.